2. Hafta

**स्वर्णाण्डजननी हंसी**

कस्यचित् कृषीवलस्य कुटीरे काचित् हंसी अभवत्। सा प्रतिदिनं एकं स्वर्णाण्डं जनयति स्म। बहुकुटुम्बी स कृषीवलः तं स्वर्णाण्डं आपणे विक्रीय तल्लब्धेन धनेन भोजनादिसामग्रीः क्रीत्वा कुटम्बं पोपयन्नास्त।

कस्मिंश्चित् दिने स कृषीवलः स्वमनसि एवमचिन्तयत् – "अहो, अस्याः हंस्याः अण्डेन यथाकथंचित् नित्यजीवनं करोमि। न अन्यानिव धनी भवामि। हंसी तु मह्यं प्रतिदिनं एकं स्वर्णाण्डं नियमेन ददाति। सत्यं, अस्याः उदरे बहूनि अण्डानि स्युः। यदि अहं अस्याः उदरं दारयेयं तर्हि एकदैव मे बहूनि स्वर्णाण्डानि लभ्येरन्। तानि

सर्वाणि विक्रीय तल्लब्धेन धनेन बहूनि दुर्लभानि पण्यानि क्रीयेय। तानि लाभाय विक्रीय धनवान् भविष्यामि" इति।

एवं निश्चित्य सः तां हंसीं अखण्डयत्। हन्त! तस्याः उदरे किमपि अण्डं स नापश्यत्। सः स्वामूर्खतां प्रति पश्चात्तापं अभजत।